# ॥ अर्धनारीश्वर स्तोत्रम् ॥

ब्रह्मोवाच

जय देव महादेव जयेश्वर महेश्वर ।

जय सर्वगुणश्रेष्ठ जय सर्वसुराधिप ॥

जय प्रकृतिकल्याणि जय प्रकृतिनायिके ।

जय प्रकृतिदूराङ्गि जय प्रकृतिसुन्दरि ॥

जयामोघमहामाय जयामोघमनोरथ ।

जयामोघमहालील जयामोघमहाबल ॥

जय विश्वजगन्मातः जय विश्वजगन्मयि ।

जय विश्वजगद्धात्रि जय विश्वजगत्सखि ॥

जय शाश्वतिकैश्वर्य जय शाश्वतिकालय ।

जय शाश्वतिकाकार जय शाश्वतिकानुग ॥

जयात्मत्रयनिर्मात्रि जयात्मत्रयपालिनि ।

जयात्मत्रयसंहर्त्रि जयात्मत्रयनायिके ॥

जयावलोकनायात्तजगत्कारणबृंहण ।

जयोपेक्षाकटाक्षोत्थ हुतभुग्भुक्तमौक्तिक ॥

जय देवाद्यविज्ञेयस्वात्मसूक्ष्मदृशोज्ज्वले ।

जय स्थूलात्मशक्त्यंशव्याप्तविश्वचराचरे ॥

जय नानैकविन्यस्तविश्वतत्त्वसमुच्चय ।

जयासुरशिरोनिष्ठश्रेष्ठानुगकदम्बक ॥

जयोपाश्रितसंरक्षासम्विधानपटीयसि ।

जयोन्मूलितसंसारविषवृक्षाङ्कुरोद्गमे ॥

जय प्रादेशिकैश्वर्यवीर्यशौर्यविजृम्भिणे ।

जय विश्वबहिर्भूतनिरस्तपरवैभव ॥

जय प्रणीतपञ्चार्थप्रयोगपरमामृत ।

जय पञ्चार्थविज्ञानसुखस्रोतःस्वरूपिणे ॥

जयातिघोरसम्सारमहारोगभिषग्वरे ।

जयाऽनादिमलाज्ञानतमःपटलचन्द्रिके ॥

जय त्रिपुरकालाग्ने जय त्रिपुरभैरवि ।

जय त्रिगुणनिर्मुक्ते जय त्रिगुणमर्दिनि ॥

जय प्रमथसर्वज्ञ जय सर्वप्रबोधिके ।

जय प्रचुरदिव्याङ्ग जय प्रार्थितदायिनि ॥

विज्ञाप्यैवं विधैस्सूक्तैर्विश्वकर्मा चतुर्मुखः ।

नमश्चकार रुद्राय रुद्राण्यै च मुहुर्मुहुः ॥

इदं स्तोत्रवरं पुण्यं ब्रह्मणा समुदीरितम् ।

अर्धनारीश्वरं नाम शिवयोर्हर्षवर्धनम् ॥

य इदं कीर्तयेद्भक्त्या यस्य कस्यापि लिप्सया ।

स तत्फलमवाप्नोति शिवयोः प्रीतिकारणात् ॥

सकलभुवनभूतभावनाभ्याम्

जननविनाशविहीनविग्रहाभ्याम् ।

नरवरयुवतिवपुर्धराभ्याम्

सततमहं प्रणतोऽस्मि शङ्कराभ्याम् ॥

॥ इति शिवम् ॥

|| ardhanārīśvara stotram ||

brahmovāca

jaya deva mahādeva jayeśvara maheśvara |

jaya sarvaguṇaśreṣṭha jaya sarvasurādhipa ||

jaya prakṛtikalyāṇi jaya prakṛtināyike |

jaya prakṛtidūrāṅgi jaya prakṛtisundari ||

jayāmoghamahāmāya jayāmoghamanoratha |

jayāmoghamahālīla jayāmoghamahābala ||

jaya viśvajaganmātaḥ jaya viśvajaganmayi |

jaya viśvajagaddhātri jaya viśvajagatsakhi ||

jaya śāśvatikaiśvarya jaya śāśvatikālaya |

jaya śāśvatikākāra jaya śāśvatikānuga ||

jayātmatrayanirmātri jayātmatrayapālini |

jayātmatrayasaṁhartri jayātmatrayanāyike ||

jayāvalokanāyāttajagatkāraṇabṛṁhaṇa |

jayopekṣākaṭākṣottha hutabhugbhuktamauktika ||

jaya devādyavijñeyasvātmasūkṣmadṛśojjvale |

jaya sthūlātmaśaktyaṁśavyāptaviśvacarācare ||

jaya nānaikavinyastaviśvatattvasamuccaya |

jayāsuraśironiṣṭhaśreṣṭhānugakadambaka ||

jayopāśritasaṁrakṣāsamvidhānapaṭiyasi |

jayonmūlitasaṁsāraviṣavṛkṣāṅkurodgame ||

jaya prādeśikaiśvaryavīryaśauryavijṛmbhiṇe |

jaya viśvabahirbhūtanirastaparavaibhava ||

jaya praṇītapañcārthaprayogaparamāmṛta |

jaya pañcārthavijñānasukhasrotaḥsvarūpiṇe ||

jayātighorasamsāramahārogabhiṣagvare |

jayā'nādimalājñānatamaḥpaṭalacandrike ||

jaya tripurakālāgne jaya tripurabhairavi |

jaya triguṇanirmukte jaya triguṇamardini ||

jaya pramathasarvajña jaya sarvaprabodhike |

jaya pracuradivyāṅga jaya prārthitadāyini ||

vijñāpyaivaṁ vidhaissūktairviśvakarmā caturmukhaḥ |

namaścakāra rudrāya rudrāṇyai ca muhurmuhuḥ ||

idaṁ stotravaraṁ puṇyaṁ brahmaṇā samudīritam |

ardhanārīśvaraṁ nāma śivayorharṣavardhanam ||

ya idaṁ kīrtayedbhaktyā yasya kasyāpi lipsayā |

sa tatphalamavāpnoti śivayoḥ prītikāraṇāt ||

sakalabhuvanabhūtabhāvanābhyām

jananavināśavihīnavigrahābhyām |

naravarayuvativapurdharābhyām

satatamahaṁ praṇato'smi śaṅkarābhyām ||

|| iti śivam ||

www.kamakotimandali.com